# विक्रमोर्वशीये जीवनमूल्यानि

**डॉ. देवेन्द्र कुमार शर्मा**
प्राचार्य
श्रीरामजीलाल स्मृति शिक्षा महाविद्यालय, पंवालिया सांगानेर, जयपुर

**जीवनमूल्यानि** मानवजीवने सामाजिकप्रतिष्ठाया आधारभूतानि तत्वानि। अद्यत्वे यत्र तत्र सर्वत्र मूल्यानां ह्रासस्य चर्चा प्रचलति। प्रस्तुतलेखे कालिदासस्य विक्रमोर्वशीये जीवनमूल्यानां विवेचनं क्रियते।

परमोदात्तप्राचीनवाङ्मयपृष्ठभूमौ विरचितासु कालिदासकृतिषु नास्ति कोऽपि आदर्शः, नास्ति किमपि यथार्थः, नाऽस्ति काऽपि भावना, नास्ति काऽपि कल्पना यामधिकृत्य मर्मज्ञकविना स्वतूलिका न चालिता। अत एव देशकालयोः सीम्नः अतीत्य तेन जनमानसमान्दोलितम्।

विक्रमोर्वशीयमिति नाम्नि त्रोटकेऽस्मिन् प्रारम्भतः जीवनस्य मूलतत्वस्य चित्रणेन परितृप्तिरनुभूयते। मूल्यानि वस्तुतः सद्गुणानां मूलभूततत्वानि, अतएव तेषां सोपानात्मकता विद्यते। अस्याः सोपानात्मकतायाः सर्वोच्चशिखरे परमात्मभूतं परमं मूल्यं विराजते।

एतदेव चित्रयन् कविः कथयति-

**वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी,**

**यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।।**

**अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते,**

**स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः।।**

कालिदासकाव्येषु प्रायोऽन्तर्निहिता व्यञ्जना वर्तते। प्रथमाङ्के सूत्रधारमाध्यमेन कविर्वदति - ''तदुच्यतां पात्रवर्गः स्वेषु पाठेष्ववहितैर्भवितव्यमिति।'' अत्राभिव्यञ्जितं यत् संसारोऽयमेकः रङ्गमञ्चः। तद्धि सर्वैः स्वविहितं कर्त्तव्यं निष्ठया पालयितव्यम्।

कालिदासेन कदापि कुत्रापि कर्त्तव्ये प्रमादः नानुमतः। उर्वश्याः प्रमादरस्खलितं वचनं क्षन्तव्यं नासीत्। ''कस्मिँस्ते भावाभिनेवश'' इति पृष्टे 'पुरुषोत्तमे' इति क्षयितव्ये पुरुरवसीति तस्या वाणी निर्गता। अस्यापराधस्य कारणात् सा शापिता।

कालिदासस्य मते अनुशासनमेकं महत्वपूर्णं जीवनमूल्यम् उर्वश्या कार्त्तिकेय एव नियमे उल्लंघिते तस्या लतारूपे परिवर्तनम् आयुषश्च अहिंसापराङ्मुखे जाते आश्रमनियमविरुद्धे आचरिते तस्य आश्रमात् निष्कासनञ्चैतदेव प्रमाणयतः।

कालिदासस्य विविधाः प्रसङ्गोपान्तोद्गाराः पात्राणां व्यवहाराश्च तस्य मूल्यविषयकं चिन्तनं प्रकाशयन्ति। अप्सरसां करुणक्रन्दनमाकर्ण्य तासामविलम्बेन परित्राणं पुरुरवसः क्षात्रधर्मानुरूपं कर्म विद्यते। अनेन कर्मणा न केवलं वर्णव्यवस्थायाम् आस्थाऽपितु परोपकारभावनाऽपि प्रकटीकृता। कृतज्ञतायां ज्ञापितायां तस्य विनयपरिपूर्णा प्रतिक्रियाऽवलोकनीया -''तनु वज्रिण एव वीर्यमेतद्विजयन्ते द्विषतो यदस्य पक्ष्याः''

अत्रोचितमेवोक्तं कालिदासेन-

''अनुत्सेकः खलु विक्रमालंकारः''

अस्मिन् नाटके पुरुरवासा उर्वशी न केवलं इन्द्रस्य अनुग्रहमात्रेणाधिगता अपितु तस्य कृतज्ञता, प्रत्युपकारप्रवृत्तिः विक्रमश्चात्र हेतुरूपेण विराजन्ते। वस्तुतः अस्यां कथायामेका विश्वदृष्टिर्व्यक्ता। मानवाः देवाश्च परस्परं प्रतिस्पर्धिनः न, अपितु एकस्मिन्नेव विश्वे स्नेहेन सहयोगेन सख्यभावेन च सहवासिनः प्राणिनः। कालिदासेन नारदस्य शब्देषु एतदेव दृष्टिकोणमभिव्यक्तम्-

**त्वत्कार्यं वासवः कुर्यात् त्वं च तस्येष्टमाचरेः।**

**सूर्यः समेधयत्यग्निमग्निः सूर्यं च तेजसा।।**

मानवः शरीरस्य मनसः आत्मनश्च समष्टिः वर्तते।

तथैव प्रेम्णोऽपि त्रीणि स्वरूपाणि विद्यन्ते-

''शारीरिकं मानसिकमाध्यात्मिकञ्च''।

शारीरिकसौन्दर्येऽऽधारितं मृगतृष्णिकावत् प्रेमा पाशविकं प्रेमा एव। एतद् उद्दामप्रेमा परितोषं प्रदातुमक्षमः। परन्तु अस्मात् निवर्तनं दुष्करम्। यथा विक्रमोर्वशीये विदूषकमुखेन कविनोक्तम्-

''परिश्रान्तोऽस्म्यहं तस्या मृगतृष्णिकाया वयस्यं विवर्तयितुम्'' कालिदासस्य काव्येषु तपसः महत्ता प्रदर्शिता। कालिदासः तपसः पराकाष्ठां प्राप्य एव विश्वसाहित्ये चरमोत्कर्षं जगाम। अस्य काव्येषु नैकेनापि नायकेन नायिकया वा प्रेमसफलता तपः अन्तरेण प्राप्ता। विक्रमोर्वशीयेऽपि विरहरूपतपसोऽनन्तरमेव फलागमः भवति।

भारतीयनारी उत्सर्गस्य त्यागस्य क्षमाया मानवतायाश्च मूर्त्तिः। एतेषां गुणानां विकासानुरूपमेव तस्या महत्त्वमाकर्षणञ्च वृद्धिमायातः 'प्रियानुप्रसादनं' नाम व्रतविशेषमाचरन्त्या देव्याः सौन्दर्यमलौकिकं खलु सञ्जातम्-सितांशुकां मङ्गलमात्रभूषणो पवित्रो पूर्वाऽङ्कुरलाञ्छितालकां व्रतापदेशोज्झितगर्वां देवीं दृष्टवा उर्वश्या मुखाद् अनायासं असूयापराङ्मुखं वाक्यं विनिःसृतम्। ''हला स्थाने खलु इयं देवीशब्देनोपचर्यते न किमपि परिहीयते शच्या ओजस्वितया। अतः यदा व्यक्तेः 'स्वः' परार्थे विलीयते तदा 'सर्वजनहिताय' सर्वजन सुखाय' सम्पन्नं जीवनम् आकर्षणकेन्द्रं जायते। यदात्मनः सुखावसानेन परेषां दुःखनिवारणं क्रियते, तदा विश्वासविशदं वातावरणं विरच्यते।

कालिदासस्य चिन्तनं विषयस्य गहनातिगहनं तलं स्पृशति। प्रायः मूल्यह्रासस्य कारणमज्ञानं अभावो वा भवति। यथोक्तमपि ''बुभुक्षितः किं न करोति पापम्'' अतः भरतवाक्येन तेन प्रार्थितम्-

''सङ्गतः श्रीसरस्वत्योः भूतयेऽस्तु सदा सताम्''

एवं कालिदासस्य विक्रमोर्वशीये यत्र तत्र जीवनमूल्यविषयकं विवेचनं तत्त्वान्वेषणञ्च उपलक्ष्यते। कवेः त्रोटकमेतत् जीवनमूल्यानां मूलभूततत्वस्य ''सत्यं शिवं सुन्दरम्'' इत्यस्य सुचारुचिचत्रणेन सहृदयेभ्यः परितोषं प्रददाति।